योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०३८

अष्टत्रिंशः सर्गः ३८

श्रीवसिष्ठ उवाच ।

चित्पश्यति जगन्मिथ्या स्ववेदनविबोधिता ।

व्योम्नि मायाञ्जनासिक्ता दृगिवाचलतान्तरम् ।। १

ब्रह्मसर्गश्चित्तसर्गो द्वावेतौ सदृशौ मतौ ।

परमार्थस्वरूपत्वादक्षुब्धत्वात्सदैव च ।। २

ज्ञानरूपतयाबाह्यं बाह्यं चानुभवात्तथा ।

सत्यरूपमतः सत्यां विद्धि बाह्यार्थरूपताम् ।। ३

बाह्यार्थवादविज्ञानवादयोरैक्यमेव नः ।

वेदनात्मैकरूपत्वात्सर्वदा सदसंस्थितेः ।। ४

अक्षुब्धखानिलालोकजलभूशान्तिशालिनी ।

तता शून्या महारम्भा ब्रह्मसत्तैव सर्वतः ।। ५

तस्मै सर्वं ततः सर्वं तत्सर्वं सर्वतश्च तत् ।

तच्च सर्वमयं नित्यं तस्मै सर्वात्मने नमः ।। ६

चिन्मयत्वाद्यदा चेत्यमेति द्रष्टृचितैकताम् ।

तदा दृश्याङ्गयैवैतच्चेत्यते नान्यथा चिता ।। ७

यदा चिन्मात्रमेवेयं द्रष्टृदर्शनदृश्यदृक् ।

तदानुभवनं तत्र सर्वस्य फलितं स्थितम् ।। ८

द्रष्टृदृश्ये न यद्येकमभविष्यच्चिदात्मके ।

तद्दृश्यास्वादमज्ञः स्यान्ना दृष्ट्वेक्षुमिवोपलः ।। ९

चिन्मयत्वाच्चितौ चेत्यं जलमप्स्विव मज्जति ।

तेनानुभूतिर्भवति नान्यथा काष्ठयोरिव ।। १०

सजातीयैकताभावाद्यद्वत्काष्ठ न चेतते ।
दारु तद्वदपि द्रष्टा दृश्यं नाज्ञास्यदाजडम् ।। ११
यादृक्सत्तानि काष्ठानि तादृग्रूपं त्वचेतनम् ।
जानन्ति नेतरत्तस्माद्दृश्यं चिद्दृश्यचेतनम् ।। १२
महाचिदात्मनैवास्ति जलानिलधराश्मतम् ।
नैतेषु स्पन्दबुद्ध्यादि प्राणजीवाद्यभावतः ।। १३
प्राणबुद्ध्यादयः सत्तां भावनावशतो गताः ।
भावना चिच्चमत्कारः स यथेच्छमुदेति च ।। १४
जगत्तया शान्ततया ब्रह्मसत्तावतिष्ठते ।
पुंस्तया गत एवात्मा रेतोवटकबीजयोः ।। १५
सर्वाग्राणुमये बीजे योऽस्मादग्रगतोऽणुकः ।
स स तत्तद्भवत्यग्रं बीजं च स्वात्मनि स्थितः ।। १६
ब्रह्म सर्वपराण्वात्मा यो यस्मादर्थतोऽणुकः ।
स स तत्तद्भवेद्वस्तु वस्तुब्रह्मैव तिष्ठति ।। १७
द्रव्यमेव यथा द्रव्यं तिर्यगूर्ध्वमधस्तथा ।
सर्वमेव तथा ब्रह्म येन तेन यथा तथा ।। १८
हेमत्वमेव नान्यत्वं हेमरूपशते यथा ।
शान्तत्वमेव शान्तस्य सर्गाहंत्वगणे तथा ।। १९
पार्श्वस्थस्वप्नमेघौघा यथा तव न काश्चन ।
सर्गप्रलयसंरम्भास्तथा खात्मान एव मे ।। २०
पङ्कता कल्पिता व्योम्नो या पुत्रकपताकिनी ।
सा यथा शान्ततामात्रं खमेवेदं तथा जगत् ।। २१
संकल्पभ्रम एवान्तः पुष्पीभूय जगत्स्थितम् ।
जलावनितलक्लिन्नबीजं कल्प इव द्रुमः ।। २२
अनहंतात्मनो ज्ञस्य सत एकत्वमासतः ।
जरत्तृणलवायन्ते ननु नामाऽणिमादयः ।। २३

त्रैलोक्ये तन्न पश्यामि सदेवासुरमानुषम् ।

एकरोमांशविश्वस्य यल्लोभाय महात्मनः ।। २४

यथा तथा स्थितस्यापि यत्र तत्र गतस्य च ।

द्वैतसंकल्पसंदोहा न सन्त्यधिगतात्मनः ।। २५

विश्वमेव नभो यस्य शून्यं सर्वं महात्मनः ।

कुतः कस्य कथं तस्य भवत्विच्छा निरात्मनः ।। २६

शान्ताशेषविशेषस्य निरेषणविशेषतः ।

सत्तामसत्तां सदृशौ क आकलयितुं क्षमः ।। २७

मारैर्न किंचिन्म्रियते जीवैः किंचिन्न जीवति ।

शुद्धसंविन्मयस्यास्य समालोकस्य खस्य च ।। २८

मिथ्या लोकस्य कचतो भ्रान्त्या मरणजन्मनी ।

असत्यपि भ्रान्तिभाजि मृगतृष्णानदीतटे ।। २९

सम्यक्परीक्षितं यावन्न भ्रान्तिर्न परीक्षकाः ।

न नाम जन्ममरणे केवलं शान्तमव्ययम् ।। ३०

दृश्याद्यो विरतिं यात आत्मारामः शमं गतः ।

स सन्नेवासदाभासः परितीर्णभवार्णवः ।। ३१

दीपनिर्वाणनिर्वाणमस्तंगतमनोगतिम् ।

आत्मन्येव शमं यातं सन्तमेवामलं विदुः ।। ३२

आबुद्ध्यादि जगद्दृश्यं यस्मै न स्वदते स्वतः ।

आकाशस्येव शान्तस्य तमाहुर्मुक्तमुत्तमाः ।। ३३

अहमस्त्यविचारेण विचारेणाहमस्ति नो ।

अभावादहमर्थस्य क्व जगत्क्व च संसृतिः ।। ३४

संवित्संवेदनादेव बुद्ध्याद्याकारवत्स्थितम् ।

रूपालोकमनोरूपं जगद्वेत्ति चिदम्बरम् ।। ३५

सर्वार्थरिक्तमनसः सतः सर्वात्मनस्तव ।

सर्वथा सर्वदा सर्वं सर्वमाचरणं शिवम् ।। ३६

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।

यत्तपस्यसि हंस्येषि तत्सर्वं शिवमव्ययम् ।। ३७

यदहं यत्त्वमाशा यद्यत्क्रियाकालखादयः ।

यल्लोकालोकगिरयस्तच्चिद्व्योम शिवं ततम् ।। ३८

यद्रूपालोकमननं यत्कालत्रितयं जगत् ।

यज्जरामरणार्त्यादि तन्महाचिन्नभः शिवम् ।। ३९

निश्चिकित्सो निराभासो निरिच्छो निर्मना मुनिः ।

भूत्वा निरात्मा निर्वाणस्तिष्ठ संतिष्ठसे यथा ।। ४०

गतेच्छमननं शान्तमनन्तस्थमभावनम् ।

व्यवहारोऽस्तु ते मा वा स्पन्दास्पन्दैर्यथानिलः ।। ४१

निर्वासना निष्कलना शान्ता पुरुषतास्तु ते ।

शास्त्रेण यन्त्रवाहेन वाह्या दारुमयी यथा ।। ४२

भूतालोकस्तु माऽऽस्नेहो मा वाऽस्नेहश्च बाह्यगः ।

अनिर्देशधरालोकश्चित्रदीपवदास्यताम् ।। ४३

निर्वासनस्य विरसस्य निरेषणस्य

शास्त्रादृते क इव तत्त्वविनोदहेतुः ।

शास्त्रार्थसज्जनमतोऽप्यमलस्य तस्य

संवेदनेष्वनभिसंधिमतः स्वरूपम् ।। ४४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे उत्तरार्धे निर्वाणवर्णनं नामाष्टत्रिंशः सर्गः ।। ३८ ।।